# संस्कृतवार्ता:

दिनाङ्क : 02/01/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

**मुख्यवार्ताः**

- प्रधानमन्त्रिणा नरेन्द्र-मोदिना महाराष्ट्रस्य सुदूरक्षेत्रे माओवाद-प्रभावित-क्षेत्रे च चतुर्दिक् विकासं सुनेश्चेतुं राज्यप्रशासनस्य प्रयास: प्रशंसित:।
- देशस्य उत्तर-क्षेत्रे सघन-कुज्झटिकया दृश्यतायां न्यूनतया च रेलयान-संचालनं प्रभावितम्।
- गणतन्त्र-दिवस-प्रयाणाय अथ च बीटिंग रिट्रीट इत्यस्मै टिकट इति प्रवेशानुमति-पत्राणां विक्रयः अद्य आरब्धः।
- हॉकीइण्डिया-लीग-इत्यस्यां स्पर्धायाम् अद्य सूरमा-हॉकी-क्लब-इति दलम् यूपी-रुद्रास् इति दलेन सह क्रीडिष्यति।

---

**प्रधानमन्त्री महाराष्ट्रम्**

प्रधानमन्त्रिणा नरेन्द्र-मोदिना महाराष्ट्रस्य सुदूरक्षेत्रे माओवाद-प्रभावित-क्षेत्रे च चतुर्दिक् विकासं सुनेश्चेतुं राज्यप्रशासनस्य प्रयास: प्रशंसित:। श्रीमोदी अवोचत् यत् एतै: प्रयासै: निश्चितरूपेण जीवनसुगमता एधिष्यते। तीव्रप्रगते: मार्गश्च प्रशस्तो भविष्यति। अमुना विशेषरूपेण गढचिरौली क्षेत्रं निकषा जना: वर्धापिता:। तत्र गतदिने एकादश नक्सलवादिभि: मुख्यमन्त्रिण: देवेन्द्र फडणवीस इत्यस्य समक्षम् आत्मसमर्पणं कृतम्। श्री फडणवीस: अवोचत् यत् अधिक-सङ्ख्यायां माओवादिनाम् आत्मसमर्पणेन महाराष्ट्रं शीघ्रं नक्सल समस्या मुक्तं भविष्यति। अत्रावसरे मुख्यमन्त्रिणा गढचिरौलीजनपदे महाराष्ट्र- राज्यपरिवहन-निगमस्य द्वात्रिंशत् किलोमीटर-मितस्य मार्गस्य उद्घाटनम् अपि कृतम्।

---

## प्रधानमन्त्री-दिल्ली

प्रधानमन्त्री नरेन्द्रमोदी श्वः राजधान्यां नवदिल्ल्यां विविध-विकास-परियोजनानां लोकार्पणं शिलान्यासं च करिष्यति। असौ दिल्ल्याः अशोक विहार-क्षेत्रे सप्तशतोत्तरैक-सहस्रं नवनिर्मित गृहाणाम् उद्घाटनं विधाय पात्रेभ्यः लाभार्थिभ्यः कुञ्जिका प्रदानं करिष्यति। सममेव श्रीमोदी दिल्ली नगरे पुनर्विकास परियोजनानाम् अपि उद्घाटनं करिष्यति।

----------------------------------

## प्रधानमन्त्री-ओ.एन्. डी. सी.

प्रधानमन्त्री अवदत् यत् ओपन् नेट्वर्क् फ़ार् डिजिटल्-कामर्स् ओ. एन्. डी. सी. इत्यनेन लघुव्यवसाय-क्षेत्रे, ई-वाणिज्यक्षेत्रे च क्रान्तिः विहिता। सामाजिक-सन्देशपटले श्रीमोदी अवदत् यत्, एतत् वृद्धिम् समृद्धिं च वर्धयितुं महत्त्वपूर्णां भूमिकां निभालयति। वाणिज्य-उद्योग-मन्त्रिणा पियूष गोयलेन निगदितं यत्, भारते ई-वाणिज्यस्य लोकतन्त्रि-करणस्य दृष्ट्या मोदी प्रशासनेन एकविंशत्यधिक-द्विसहस्र-तमे वर्षे ओ. एन्. डी. सी. इत्यस्य आरम्भः कृतः। सः अवदत् यत् विगतेषु त्रिषु वर्षेषु, तेन अनेकानि लक्ष्यानि संप्राप्तानि। अथ च अन्तर्जाल-मध्ये तेषां कृते समानं स्पर्धाक्षेत्रं निर्मीय व्यवसायाः, विशेषतः लघु-उद्यमाः सशक्ताः अभवन् ।

----------------------------------

## रेलयानानां विलम्बः

देशस्य उत्तर-क्षेत्रे सघन-कुज्झटिकया दृश्यतायां न्यूनता दृश्यते। अनेन कारणेन नैकानि रेलयानानि प्रभावितानि। भारतीय-रेल-विभागानुसारं दिल्ली-नगरं प्रत्यागम्यमानानि त्रिचत्वारिंशत् यावत् रेलयानानि पञ्चहोरापर्यन्तं विलम्बेन प्रचलन्ति । तेषु पद्मावत एक्स्प्रेस्, कालिन्दी एक्स्प्रेस्, श्रमशक्ति एक्स्प्रेस्, महाबोधी एक्स्प्रेस्, आश्रम एक्स्प्रेस्, विक्रमशिला एक्स्प्रेस्, कैफियात् एक्स्प्रेस् इत्येतानि रेलयानानि सन्ति । विभागेन यात्रिभिः निवेदितं यत् ते यात्रायाः प्राक् रेलयानानां स्थितिम् अवश्यम् अवलोकयन्तु ।

----------------------------------

## भाजपा दिल्ली

भारतीय-जनता-पार्टी इति दलेन अद्य केन्द्र-प्रशासनेन आरब्ध- परियोजना-विषये राष्ट्रिय-राजधानी-क्षेत्रे मार्गाणाम् आधारभूत-संरचनायाः च विकासं प्रति निज-प्रतिबद्धता पुनः प्रकटिता। नव-दिल्ल्यां वार्ताहरान् सम्बोधयन् वरिष्ठ-नेता केन्द्रीय-मन्त्री च हर्ष-मल्होत्रा अवोचत् यत् तेन सेन्ट्रल-विस्ता इति भवनं मैट्रो मार्गेण सह संयोजयितुं केन्द्र-प्रशासनं निवेदतम्। अनेन जनानां यात्रा सुखदा भविष्यति।

भाजपेति दलस्य नेता मनोज-तिवारी अपि आम आदमी पार्टी दलम् अधिक्षिपत् यत् आप दलेन राष्ट्रिय-राजधान्यां विकास-गतिः न्यूनतां याता।

------------------------------------

## ऋतु-सञ्चेतना

ऋतुविज्ञानविभागेन अद्य पञ्जाब-हरियाणा-चण्डीगढ़-दिल्ली अथ च उत्तर-प्रदेशस्य कतिपय-भागेषु मध्य रात्रौ प्रभाते च प्रबल-कुच्छटिका-प्रभावः अनुमानितः। सममेव हिमाचल-प्रदेश-राजस्थान-मध्य-प्रदेश-छत्तीसगढ़-हिमालयोपत्यकायुते पश्चिम-बङ्गाले पूर्वोत्तर-राज्येषु च श्वः यावत् समान-स्थिते: सम्भावना विद्यते। आकाशवाण्या सह संवादे ऋतुविज्ञानविभागस्य वैज्ञानिकः सोमा-सेन-रॉयः अवोचत् यत् जम्मूकश्मीर-हिमाचल-प्रदेशयोः सप्ताहान्तं यावत् प्रबलवृष्टेः हिमपातस्य प्रचण्डवातेश्च सम्भावना वर्तते।

ऋतुविज्ञानविभागेन धीवराः अपि आगामि दिनद्वये मन्नार-खात्यां कोमोरिन-क्षेत्रे दक्षिण-पश्चिम-बङ्गाल-खात्यां दक्षिण-पश्चिम अरब-सागरस्य दक्षिण-भागेषु च न गन्तुं परामृष्टाः।

------------------------------------

## बिहार/राज्यपाल-शपथग्रहणम्-

बिहारे नवनियुक्तेन राज्यपालेन आरिफ मोहम्मदखान इत्यनेन अद्य राज्यस्य द्विचत्वारिंशत्तमस्य राज्यपालपदस्य गोपनीयतायाः शपथ-वचनं गृहीतम्। पटना उच्च-न्यायालयस्य मुख्यन्यायाधीशः न्यायमूर्ति: के.विनोदचन्द्रनः पटनानगरस्य राजभवने आयोजिते कार्यक्रमे तस्मै शपथग्रहणं कारितवान्।

------------------------------------

**गणतन्त्रदिवसः**

**गणतन्त्र-दिवस-प्रयाणाय अथ च बीटिंग रिट्रीट इत्यस्मै टिकट इति प्रवेशानुमति-पत्राणां विक्रयः अद्य आरब्धः। रक्षा-मन्त्रालयेन उक्तं यत् प्रवेशानुमति-पत्राणि सेना-भवन-शास्त्रिभवन-जन्तर-मन्तर-प्रगति-मैदान-राजीव-चौक चेति मेट्रो स्थासनेभ्यः मूल-परिचय-पत्राणि प्रदर्श्य क्रेतुं शक्यन्ते। एतदतिरिच्य aamantran.mod.gov.in इति वेबफलकात् अथ च Aamantran Mobile app इति चलदूरभाषीय-तन्त्रात् अपि प्रवेशानुमति-पत्राणि क्रेतुं शक्यन्ते।**

**-----------------------------------**

**भारत-वानूआतू**

**भारतेन भूकम्पेन प्रभाविताय वानूआतू देशाय पुनर्वास-पुनर्निर्माणादिनां प्रयासानां कृते पञ्चलक्ष-डॉलर्-मितरूप्यकाणां साहाय्यं प्रेषितम् । गतमासे सप्तदशदिनाङ्के दक्षिण-प्रशान्त-महासागरे वानूआतू-देशस्य समीपं सप्त दशमलव चत्वारि तीव्रस्तरीय: भूकम्पः अनुभूत:। यस्मिन् प्रमुखतया जनधनहानिः जाता । भारतेन वानूआतू -देशस्य जनान् प्रति गभीराः शोकसंवेदनाः प्रकटिताः। अस्मिन् कष्टप्रद-समये सर्वविध- सम्भवं समर्थनं सहायतां च प्रदातुं स्वस्य प्रतिबद्धता प्रकटिता ।**

**-----------------------------------**

**हॉकीतिप्रतिस्पर्धायां**

**हॉकीति-प्रतिस्पर्धायाम् अद्य राउरकेलाया: बिरसा-मुण्डा-हॉकी-क्रीडाङ्गणे हॉकीइण्डिया-लीग-इत्यस्यां स्पर्धायां सूरमा-हॉकी-क्लब-इति दलम् यूपी-रुद्रास् इति दलेन सह क्रीडिष्यति। एषा स्पर्धा रात्रौ सपाद अष्ट-वादने आरप्स्यते। इतः पूर्वं गतरात्रौ श्राची-राढ-बङ्गाल-टाईगर्स्-इति दलेन टीम-गोनासिका-इत्येतद्दलं द्वे एकम् इत्यङ्कान्तरालेन पराजितम्।**

**इति वार्ता।**